IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# महर्षेः अरविन्दस्य दृष्ट्या वङ्गीयनवजागरणम्

(MAHARSHEHE ARAVINDASYA DRISTYA VANGIYA NAVAJAGARANAM)

**Prince Chakraborty**
**Research Scholar**
**National Sanskrit University**
**Tirupati (A.P)**

## भूमिका-

अरविन्दघोषः वङ्गप्रदेशे कोनानगरप्रान्ते 1872 तमे वर्षे अगस्तमासस्य 15 दिनाङ्के जन्म अलभत। अष्टमवर्षे एव एषः इङ्गलैण्डदेशं प्रति प्रेषितः आसीत्। सेन्ट् पाल् विद्यालये पठनसमये ग्रीक्-ल्याटिनादिशास्त्रीयभाषासु अरविन्दस्य अभिरुचिः उत्पादिता आसीत्। पाश्चात्ये पठनं समाप्य 1893 तमे वर्षे भारतं प्रत्यागतः अरविन्दः। बडौदाप्रान्ते सः राज्यसेवायां नियुक्तः अभवत्। तत्र प्राचीनभारतीयदर्शनशास्त्राणां विस्तृताध्यायनाय समुचितावसरः लब्धः अवर्तत। अनन्तरसमये सः राजनैतिकजीवने प्रवेशम् अकरोत्। 1908 वर्षे सः कारागृहे प्रविष्टः अभवत्।

कारावाससमये तेन अनुभूतं यत् तस्य अदृष्टं किञ्चिदन्यमेव अस्ति। अनया अनुभूत्या अरविन्दः योगी सञ्जातः। तस्य मनसि विशिष्टाध्यात्मिकविचारः योगरूपविचारः च आगतः आसीत्। तादृशविचाराणां स्पष्टरुपं प्रदातुं पण्डिचेर्याम् आश्रमं निर्मायमास।

विंशशताब्देः प्रारम्भे वङ्गप्रदेशे तथा आभारते जातीयताबोधस्य विकासः सुसम्पादितः अभवत्। तत्र ये व्यक्तिप्रमुखाः महत्वपूर्णां भूमिकां पालितवन्तः तेषु अरविन्दघोषः अन्यतमः।

## वङ्गीयनवजागरणम्-

पाश्चात्यविज्ञानं युक्तिवादः दर्शनं मानवतावादः औदार्यञ्चेत्यादयः वङ्गीयमनस्सु एकम् अभूतपूर्वं परिवर्तनम् आनितवन्तः। अनेन परिवर्तनेन वङ्गे नवजागरणस्य आरम्भः जातः आसीत्। हिन्दुधर्मस्य संस्कारसाधनं वङ्गीयनवजागरणस्य प्रधानविषयो भवति। राजाराममोहनरायः देवेन्द्रनाथठाकुरः श्रीरामकृष्णपरमहंसश्च एते प्रभृतयः हिन्दुधर्मस्य पौत्तलिकतां पुरोहिततन्त्रम् आचारसर्वस्वतां च दूरीकर्तुं प्रचेष्टितवन्तः। विषये अस्मिन्

व्यक्तिवर्गानां मतान्यपि भिन्नानि वर्तन्ते। रमेशचन्द्रमजुमदारः कथयति यत् पाश्चात्यसभ्यतायाः संस्पर्शेन जनेषु मानवतावादः युक्तिवादश्च स्फुरितो अभवत्।[1] ड. अमलेश त्रिपाठी अकथयत् प्राच्यपाश्चात्ययोः सम्मिश्रणेन यत् बीजम् अङ्कुरीतं तदेव नवजागरणस्य भित्तिः।[2] ऐतिहासिकः यदुनाथसरकारः उल्लिखति ऊनविंशशतके वङ्गप्रदेशः नवजागरणस्य पीठस्थानम् आसीत् इति।[3] अध्यापकः सुशोभनसरकारः कथयति ऊनविंशशतके वङ्गे सुसंघटितं सांस्कृतिकजागरणम् एव साधारणतया नवजागरणम् उच्यते।[4]

ऋषि-अरविन्दस्य दृष्टौ वङ्गीयनवजागरणं किदृशमासीत् इत्ययं प्रबन्धः प्रधानतः ष्जीम त्मदंपेंदबम पद प्दकपं ंदक व्जीमत म्ेेंले वद प्दकपंद ब्नसजनतमष इति ग्रन्थे स्थानं प्राप्तवान्।

**ऋषेः दृष्टौ वङ्गीयनवजागरणम्-**

वङ्गीयानाम् आधुनिकेतिहासः पर्यालोच्यते चेत् इदं प्रतिभातं भवति यत् नवजागरणेन जातीयचेतना सुसंगठिता अभवत्। ऋषेः अरविन्दस्य मतानुसारं वङ्गीयनवजागरणम् आध्यात्मिकजातीयतावादम् अधिकृत्य संगठितम् आसीत्। अन्तरस्थशक्तिरेव प्रकृतशक्तेः उत्सभूता इति अनुभवः एव नवजागरणम्। संस्कृतेः संरक्षणाय नवजागरणमेव एकमात्रः पन्थाः। आध्यात्मिकादर्शसमूहानां साहाय्येन अर्वाचीननवीन-आक्रमणशीलशक्तिप्रबलविश्वस्य सम्मुखीकरणं नवजागरणम्।

इदं मतं परिपोषयितुं शक्यं यत् नवसृष्टिः नाम निश्चलभावेन पुरातने एव अवरुद्धतया स्थितिर्नास्ति अपि तु जीवनस्य एकमात्रः पन्थाः तथा मुक्तये उपायश्चेति। पाश्चातेभ्यः तदा किमपि ग्रहणम् अप्रयोजनं भवति। अस्माकम् आवश्यकं सर्वम् अस्मासु एव विद्यामानं वर्तत इति ऋषेः अभिप्रायमासीत्।

चित्तरञ्जनदाससम्पादिते नारायणपत्रिकायां नवजागरणविषये उक्तं वर्तते यत् जातीयप्रकृतेः अनुयायीतया जातीयधारायां सम्पूर्णाभ्यन्तरतया नवजागरणं गठितं भवेत्। तत्र उच्यते मानवतावादः एकः एव किन्तु विभिन्नजातिसमूहः तादृशसाधारणमानवतावादस्य वैचित्रविशिष्ट-आत्मरुपराजिरिति।[5] यदा वयम् एकत्वं पश्यामः तदा कस्याश्चिज्जातेः वैशिष्ट्यजनितं तत्त्वं न विनश्यति अपि तु तज्जातेः समर्थनं पश्यामः। विशिष्टशक्तिं प्रकृतिं च विलोप्य एकत्वं वयं न लभामहे किन्तु तद्वैशिष्ट्यम् अनुसृत्य कर्माणि उच्चतमसम्भावनायाम् उन्नीतं कृत्वा च ऐक्यं प्राप्तुं शक्नुमः।

अरविन्दः पुनः पुनः अकथयत् यत् समरुपता न प्रकृत-एकत्वम्। तत् जीवनं ध्वंसयति। यथार्थ-एकत्वं सुप्रतिष्ठितं चेत् तन्मध्यस्थितशक्तेः समृद्ध्यवैचित्रतः तत् प्राणवन्तं

---

[1] An Advanced History of India, R.C.Majumdar and H.C.Raychaudhuri, Pg. No. 26

[2] □□□□□□ □□□□□□□□□ □□□□□□□□ □□□□□□□□, □□□□□ □□□□□□□□, Pg.No. 15

[3] Military History of India, Jadunath Sarkar, Pg No. 109

[4] Notes on the Bengali Renaissance, Amit Sen, Pg No. 72

[5] □□□□□□□□□□□□□□

सरलं कार्ययुक्तं च भवति। विलुप्तप्राय-आध्यात्मिकतां पुनः संगृह्य स्वजीवने प्रतिष्ठापनमेव नवजागरणम्। यत्किमपि कर्तव्यं भवति तत्सर्वं स्वशक्त्या स्वप्रतिभया वा करणीयमिति एव परित्राणाय एकमात्रः उपायः।

नवजागरणेन अन्तस्थशक्तिः उद्दीपिता अभवत्। उत्तेजकरुपेण व्यक्तिमनस्सु नूतनचिन्तनम् आभासयति। स्वहृदयस्थपिहितद्वारम् उद्घाट्य अन्तस्थनिद्रितशक्तिसमूहान् जागरयति। सत्तायाः आत्मचेतनायाम् एका नूतना क्रियाधारा उन्मोचिता भवति तथा नूतनभावनायाः बोधश्च प्रस्फुटितो भवति। सत्तासु इदमेकं सम्भावितोपादानरुपेण भवितुम् अर्हति। अन्तस्थशक्तेः एकत्वरुपेण पुनर्गठनम्, आन्तसत्ताभिः सह सामञ्जस्यसम्पादनं, स्वात्मचेतनया च नूतनतया व्याख्यातव्यं भवति। पारिपार्शिकस्थितेः परिवर्तनेन उत प्रभावसमूहानाम् आक्रमणेन वा एते क्रियासमूहाः एकत्रिताः सन्तः कार्यं कुर्वन्ति। तदा बृहदात्मोन्नतिप्रदायकं परिवर्तनं नवजागरणं उपस्थितं भवति।

कालः तत्प्रभावश्च सर्वान् जीवान् सर्वाणि वस्तुनि वा अग्रे नयति। वयं स्वसत्तायाः भूतरुपं पुनःप्राप्तुं न शक्नुमः किन्तु सम्मुखे अग्रसराः भूत्वा अस्माकम् अधिकारं पुनः लब्धुं शक्नुमः येन नवगठितजीवनं प्राप्स्यामः। अतीतमहत्प्रकृतेः आदर्शस्य च सार्थकालोचना भवति। तत्सम्बन्धितभावना तद्रुपं भाषा तत्परिणतिश्च नूतनभावनया अभिज्ञानेन वा परिवर्तिता भवति। वयं तत्सर्वं भूतालोकेन न अपि तु नूतनालोकेन द्रष्टुं शक्नुमः। नूतनदृष्ट्या तस्य समर्थनं कुर्मः। पुरातनशब्दानाम् अर्थोऽपि परिवर्तितः विस्तृतः समृद्धश्च भवति।

वङ्गीयनवजागरणं ऋषिणा ꣲअध्यात्मसाधनाꣲ इति आख्यया आख्यायितम् अस्ति। भारतमातुः पुरातनसन्ततयः धर्मकल्मषे अधर्मे च जन्म प्राप्य तादृशशिक्षां च संगृह्य स्वल्पायुवन्तः क्षुद्राशयाः स्वार्थपरायणाः सङ्कीर्णहृदयाश्च अभवन्। तेषु च केचन महात्मानः देहं सम्प्राप्य ईदृशः विषमापदात् जातिं रक्षितवन्तः। तेषां पुण्यबलेन नवजागरणस्य आलोकः चतुर्दिक्सु उद्भासितः। नूतनसन्ततयः साहसिनः तेजस्विनः उच्चाशयवन्तः उदारचरिताः स्वार्थत्यागीनः देशहितसाधकाः उच्चाकाङ्क्षापूर्णाश्च अभवन्। एते युवकाः महाशक्तिसम्पन्नाः अग्निस्फुलिङ्गाः समस्तजड़तां परित्यज्य नूतनतया समाजं निर्मातुम् उद्यताः सन्ति। अस्मिन् नूतने प्राचीनस्यापि प्रभावः विद्यते।

वङ्गीयानां मनः तदधिकृत्य जीवमानाः सर्वेऽपि, मनः यत् पर्यवेक्षति यत्र क्रियां करोति चेत्येतैः परिवर्तितं भवति। परिवर्तितं भवति यदा नूतनचिन्तनस्य नूतनभावनायाः उपादानं गृह्णाति। परिवर्तितं भवति यदा तैः अभिप्रेरितं सद् नूतनक्रियावलिषु जागर्त्ति। केनापि

अस्वीकृतः वर्जितो वा भवति चेदपि परिवर्तितं भवति। प्राचीनभावनां सद्वस्तु वा विरोधीभावं खण्डयितुं वयं यदा प्रयुञ्जमहे तदा प्राचीनचिन्तनं नूतनतया अस्मदभिमुखं प्रकटितो भवति।

## उपसंहारः-

वङ्गीयैः सर्वैः समर्थमनस्कैः विचारः करणीयः किञ्च स्वप्रज्ञया स्वशक्त्या वा समाधातव्यः यथा राममोहनादयः समाधानं कृतवन्तः। वङ्गीयनवजागरणस्य प्रकृतिः सार्वभौमशक्तिः वा नूतनसमाजं निर्मातु कार्यं प्रारभत् तदेव शेषं प्रयोजनं साधयिष्यति इति।

महर्षिः योगी अरविन्दः महान् सन्तः साधकः शिक्षाशास्त्री राष्ट्रवादी क्रान्तिकारी विचारकश्च आसीत्। प्राच्यपाश्चात्यसंस्कृत्योः विचारे समन्वयः सम्पादितः ऋषिणा। स्वसिद्धान्ताय आदर्शाय च भारतीयानां मनसि सः चिरजीवितः अस्ति।

## सन्दर्भग्रन्थसूची-


- *भारतीय संस्कृतिर भित्ति* (वङ्गीयग्रन्थः) रू श्री अरविन्द, श्रीअरविन्द आश्रम, पण्डिचेरी
- *इतालीर रेनेसाँस, वाङ्गालीर संस्कृति* (वङ्गीयग्रन्थः) रू अमलेश त्रिपाठी, आनन्द पाबलिशार्स 2015
- Is India Civilised? A Defence of Indian Culture : Sri Aurobindo, Standard Book Agency, Kolkata 2016
- Essay 'Indian culture and External Influence' : Sri Aurobindo, Arya Journal, March 1919
- The Renaissance In India : Sri Aurobindo, Sri Aurobindo Ashram Publication Department 2002
- The Spirit of the Renaissance, Recollections Doubts and Affirmations : Sibnarayan Ray, Renaissance Publishers Private Limited 1999
- Between Renaissance and Revolution : Sibnarayan Ray, Renaissance Publishers Private Limited 2006
- An Advanced History of India : R.C.Majumdar and H.C.Raychaudhuri, Laxmi Publications Pvt. Ltd. 2016
- Military History of India : Jadunath Sarkar, Sarkar Jadunath 2019
- Notes on the Bengali Renaissance : Amit Sen, Scholar Select 2015
- समकालीन भारतीय दर्शन रू बसन्त कुमार लाल, मोतीलाल बनारसीदास 2016